# Shri Shabarigirisha Ashtakam

# શ્રીશબરિગિરીશાષ્ટકમ્

## Document Information

Text title : shabarigiriishaaShTakam

File name : shabarigiri8.itx

Category : aShTaka, deities_misc, ayyappa

Location : doc_deities_misc

Transliterated by : Antaratma antaratma at Safe-mail.net

Proofread by : Antaratma, PSA Easwaran

Latest update : July 10, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2022

*sanskritdocuments.org*

# શ્રીશબરિગિરીશાષ્ટકમ્

યજનસુપૂજિતયોગિવરાર્ચિત યાદુવિનાશક યોગતનો
યતિવરકલ્પિતયન્ત્રકૃતાસનયક્ષવરાર્પિતપુષ્પતનો ।
યમનિયમાસનયોગિહૃદાસનપાપનિવારણકાલતનો
જય જય હે શબરીગિરિમન્દિરસુન્દર પાલય મામનિશમ્ ॥ ૧॥

મકરમહોત્સવ મઙ્ગલદાયક ભૂતગણાવૃત દેવતનો
મધુરિપુમન્મથમારકમાનિત દીક્ષિતમાનસ માન્યતનો ।
મદગજસેવિત મઞ્જુલનાદકવાદ્યસુઘોષિતમોદતનો
જય જય હે શબરીગિરિમન્દિરસુન્દર પાલય મામનિશમ્ ॥ ૨॥

જય જય હે શબરીગિરિનાયક સાધય ચિન્તિતમિષ્ટતનો
કલિવરદોત્તમ કોમલકુન્તલ કઞ્જસુમાવલિકાન્તતનો ।
કલિવરસંસ્થિત કાલભયાર્દિત ભક્તજનાવનતુષ્ટમતે
જય જય હે શબરીગિરિમન્દિરસુન્દર પાલય મામનિશમ્ ॥ ૩॥

નિશિસુરપૂજનમઙ્ગલવાદનમાલ્યવિભૂષણમોદમતે
સુરયુવતીકૃતવન્દન નર્તનનન્દિતમાનસ મઞ્જુતનો ।
કલિમનુજાદ્ભુત કલ્પિતકોમલનામસુકીર્તનમોદતનો
જય જય હે શબરીગિરિમન્દિરસુન્દર પાલય મામનિશમ્ ॥ ૪॥

અપરિમિતાદ્ભુતલીલ જગત્પરિપાલ નિજાલયચારુતનો
કલિજનપાલન સઙ્કટવારણ પાપજનાવનલબ્ધતનો ।
પ્રતિદિવસાગતદેવવરાર્ચિત સાધુમુખાગતકીર્તિતનો
જય જય હે શબરીગિરિમન્દિરસુન્દર પાલય મામનિશમ્ ॥ ૫॥

કલિમલકાલન કઞ્જવિલોચન કુન્દસુમાનન કાન્તતનો
બહુજનમાનસકામસુપૂરણ નામજપોત્તમ મન્ત્રતનો ।
નિજગિરિદર્શનયાતુજનાર્પિતપુત્રધનાદિકધર્મતનો
જય જય હે શબરીગિરિમન્દિરસુન્દર પાલય મામનિશમ્ ॥ ૬॥

શતમુખપાલક શાન્તિવિદાયક શત્રુવિનાશક શુદ્ધતનો
    તરુનિકરાલય દીનકૃપાલય તાપસમાનસ દીપ્તતનો ।
હરિહરસમ્ભવ પદ્મસમુદ્ભવ વાસવશમ્ભવસેવ્યતનો
    જય જય હે શબરીગિરિમન્દિરસુન્દર પાલય મામનિશમ્ ॥ ૭॥

મમકુલદૈવત મત્પિતૃપૂજિત માધવલાલિતમઞ્જુમતે
    મુનિજનસંસ્તુત મુક્તિવિદાયક શઙ્કરપાલિત શાન્તમતે ।
જગદભયઙ્કર જન્મફલપ્રદ ચન્દનચર્ચિતચન્દ્રરુચે
    જય જય હે શબરીગિરિમન્દિરસુન્દર પાલય મામનિશમ્ ॥ ૮॥

અમલમનન્તપદાન્વિતરામસુદીક્ષિત સત્કવિપદ્યમિદં
    શિવશબરીગિરિમન્દિરસંસ્થિતતોષદમિષ્ટદમાર્તિહરમ્ ।
પઠતિ શ઼ૃણોતિ ચ ભક્તિયુતો યદિ ભાગ્યસમૃદ્ધિમથો લભતે
    જય જય હે શબરીગિરિમન્દિરસુન્દર પાલય મામનિશમ્ ॥ ૯॥

ઇતિ શ્રી શબરીગિરિશાષ્ટકં સમ્પૂર્ણમ્ ॥

Encoded by Antaratma antaratma at Safe-mail.net

Proofread by Antaratma, PSA Easwaran

*Shri Shabarigirisha Ashtakam*

pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*